শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে দ্বাত্রিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে দ্বাত্রিংশং দশকম্ ॥

## মৎস্যাৱতারৱর্ণনম্

পুরা হযগ্রীৱমহাসুরেণ
    ষষ্ঠান্তরান্তোদ্যদকাণ্ডকল্পে।
নিদ্রোন্মুখব্রহ্মমুখাদ্ধৃতেষু
    ৱেদেষ্ৱধিৎসঃ কিল মৎস্যরূপম্॥ **32.1** ॥

সত্যব্রতস্য দ্রমিলাধিভর্তু -
    র্নদীজলে তর্পযতস্তদানীম্।
করাঞ্জলৌ সঞ্জ্ৱলিতাকৃতিস্ত্ব -
    মদৃশ্যথাঃ কশ্চন বালমীনঃ॥ **32.2** ॥

ক্ষিপ্তং জলে ৎৱাং চকিতং ৱিলোক্য
    নিন্যেঽম্বুপাত্রেণ মুনিঃ স্বগেহম্।
স্বল্পৈরহোভিঃ কলশীং চ কূপং
    ৱাপীং সরশ্চানশিষে ৱিভো ৎৱম্॥ **32.3** ॥

যোগপ্রভাৱাদ্ভৱদাজ্ঞযৈৱ
    নীতস্ততস্ত্বং মুনিনা পযোধিম্।
পৃষ্টোঽমুনা কল্পদিদৃক্ষুমেনং
    সপ্তাহমাস্ৱেতি ৱদন্নযাসীঃ॥ **32.4** ॥

প্রাপ্তে ৎৱদুক্তেঽহনি ৱারিধারা -
    পরিপ্লুতে ভূমিতলে মুনীন্দ্রঃ।

সপ্তর্ষিভিঃ সার্ধমপারৱারি -
ণ্যুদ্ঘূর্ণমানঃ শরণং যযৌ ৎৱাম্॥ **32.5**॥

ধরাং ৎৱদাদেশকরীমৱাপ্তাং
নৌরূপিণীমারুরুহুস্তদা তে।
তৎকম্পকম্প্রেষু চ তেষু ভূয -
স্ত্বমম্বুধেরাৱিরভূর্মহীযান্॥ **32.6**॥

ঝষাকৃতিং যোজনলক্ষদীর্ঘাং
দধানমুচ্চৈস্তরতেজসং ৎৱাম্।
নিরীক্ষ্য তুষ্টা মুনযস্ত্বদুক্ত্যা
ৎৱত্তুঙ্গশৃঙ্গে তরণিং ববন্ধুঃ॥ **32.7**॥

আকৃষ্টনৌকো মুনিমণ্ডলায
প্রদর্শযন্ ৱিশ্ৱজগদ্বিভাগান্।
সংস্তূযমানো নৃৱরেণ তেন
জ্ঞানং পরং চোপদিশন্নচারীঃ॥ **32.8**॥

কল্পাৱধৌ সপ্তমুনীন্ পুরোৱৎ
প্রস্থাপ্য সত্যৱ্রতভূমিপং তম্।
ৱৈৱস্ৱতাখ্যং মনুমাদধানঃ
ক্রোধাদ্ধযগ্রীৱমভিদ্রুতোঽভূঃ॥ **32.9**॥

স্ৱতুঙ্গশৃঙ্গক্ষতৱক্ষসং তং
নিপাত্য দৈত্যং নিগমান্ গৃহীৎৱা।
ৱিরিঞ্চযে প্রীতহৃদে দদানঃ
প্রভঞ্জনাগারপতে প্রপাযাঃ॥ **32.10**॥

॥ ইতি শ্রীমন্নারাযণীযে দ্বাত্রিংশং দশকং সমাপ্তম্॥